हित्यग्रन्थमाला-३७

महाकविभोलानाथविरचितं

# श्रीकृष्णलीलामृतम्

( पूर्णेन्दुसंस्कृतटीकोपेतं सम्पादनं भाषार्थश्च )



पूर्णचन्द्र उपाध्यायः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

लोकप्रियसाहित्यग्रन्थमाला-३७

महाकविभोलानाथविरचितं

# श्रीकृष्णलीलामृतम्

( पूर्णेन्दुसंस्कृतटीकोपेतं सम्पादनं भाषार्थश्च )


सम्पादकः, टीकाकारः

भाषानुवादकश्च

**डॉ. पूर्णचन्द्र उपाध्यायः**



राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# भूमिका

साम्प्रतिकोऽयं समयो वर्तते संस्कृतविद्यानुशीलने नवोन्मेषस्य नूतनसम्भावनानां च। उदीयमाना युवानो विद्वांसः न केवलं पाण्डित्येन प्रथयन्ति शास्त्रपरम्पराः, क्वचित्पुरातनग्रन्थागारेभ्योऽज्ञातप्राया दुर्लभा पुरातन्यो मातृका उद्धृत्य तासां पाठालोचनपुरस्सरं नवीनसंस्करणादिसम्पादनेनापि तेजस्विनीं स्वकीयामधीतिं ते विदधति इति शक्यं सपरितोषमुच्छ्वसितुम्।

आदशमशतकात् आसाम्प्रतिकाच्च शतकात् संस्कृतसाहित्यरचना-परम्परा नव्यभारतीयभाषाणां सम्पर्कमवाप्य नवीनां प्रवृत्तीः श्रयति। तेन लोकभाषाया च्छन्दांसि भावच्छटा च तस्यां विच्छुरिता। इयं प्रक्रिया महाकविजयदेवविरचितगीतगोविन्दात् प्रारब्धा क्वचित् पण्डितराजे जगन्नाथे क्वचित् विश्वेश्वरपाण्डेप्रभृतिषु तथैव च बहुषु विंशशतकभवेषु महाकविषु विजृम्भते। एतादृशेषु कविषु उल्लेखमर्हति श्रीभोलानाथः। अष्टादशशतकभवः संस्कृत-हिन्दी-पञ्जाबीभाषासाधारणम् असाधारणं रचनाकौशलं वितन्वानोऽयं कविर्भोलानाथः नातिप्रसिद्धोऽपि सिद्धसरस्वतीप्रसाद इति सर्वथा स्मरणीयः। एतस्य कर्णकुतूहलं नाम संस्कृतरूपकं विज्ञायत एव। परं हृद्यनिरवद्यपद्यसंवलितं अमन्दसौन्दर्यनिधानभूतमपि श्रीकृष्णलीलामृतं नाम काव्यमस्य न तथा प्रथां गतम्। एतस्य काव्यस्य समुद्धारं कृतवान् संस्कृतटीकाभाषानुवादसंवलितेन नवीनेन पाठालोचनसहितेन संस्करणेन सुधीः पूर्णचन्द्रोपाध्याय इति स सर्वथा साधुवादार्हः।

अस्मिन् काव्ये कृष्णचरितं विषयीकृतम्। मुगलकालभवेन कविना कृष्णस्य कालियदमनवर्णनव्याजेन लोकोद्धारकमपि रूपं प्रकटीकृतम्, तथैव लोकोत्तरसौन्दर्यवैशद्यमपि विभावितम्। स्वच्छन्दं विविधच्छन्दसां वरणं विहितवती कवेर्लेखनी अस्मिन् काव्ये। अलङ्काराणाम् अनुपमा सुषमा,

भगवतामरशरीरधारणपूर्वकमवतारग्रहणेन पुण्यवद्भिः तद्दर्शनजन्यपुण्येन मोक्षात्मकं फलं प्राप्यते। तदिदं भगवत्सत्तात्मकं तत्त्वं समग्राणां चतुर्दशभुवनानामाधारभूतमस्ति, इति हेतोः भक्तानां सर्वथा कल्याणसाधकम्। अद्वितीयब्रह्मस्वरूपकोऽयं श्रीकृष्णः मे चेतसि सर्वदैव लसतामिति कविः भोलानाथः नितरां कामयते इति भावः।

पद्यमिदं शार्दूलविक्रीडितच्छन्दसा निबद्धम्। एतल्लक्षणं यथा-

**''सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्'' इति।**

**भाषार्थः**- जिस श्रीकृष्ण के पवित्रतम जन्मवृत्तादि पुण्यात्मा सज्जनों के स्वर्ग एवं मोक्ष प्राप्ति का कारण है और जिस तत्त्व को साररूप से ब्रह्म कहा जाता है, जो कि समग्र संसार का आधार स्तम्भ है, और जो समस्त भक्तों के कल्याणकारी है, ऐसे अनन्त शाश्वत अद्वितीय सत्तात्मक वह श्रीकृष्ण मेरे हृदय में नित्य निवास करें।

**नमस्तुभ्यं नमस्तुभ्यं कृष्णायामिततेजसे।**
**पूर्णेन्दुवदनानन्दगृहीताखिलचेतसे ।। 8 ।।**

**अन्वयः**- पूर्णेन्दुवदनानन्दगृहीताखिलचेतसे अमिततेजसे कृष्णाय तुभ्यं नमः तुभ्यं नमः।

**संस्कृतव्याख्या**- पूर्णश्चासौ इन्दुश्चेति पूर्णेन्दुः (कर्मधारयः) पूर्णचन्द्रः स इव वदनम् आननं यस्य सः पूर्णेन्दुवदनः स एव आनन्दः आह्लादकः तस्मात्कारणादेव गृहीतानि आकृष्टानि अखिलानि समस्तानि चेतांसि अन्तःकरणानि येन तस्मै, अमिततेजसे न मितानि अमितानि नाम अपरिमितानि तेजांसि ओजांसि यस्य तस्मै, कृष्णाय वासुदेवाय, तुभ्यं भवते, नमः प्रणामः, तुभ्यं ते, नमः नमस्कारः।

अलौकिकसौन्दर्यवत्त्वात्सकलभक्तहृदयग्राहिणेऽपरिमितपराक्रमशालिने वासुदेवाय ते नमः इति भावः। पद्यमिदमनुष्टुप्छन्दसा निबद्धम्, अपि चात्रानुप्रासालंकारस्यालंकरणत्वम्।



**भाषार्थः**- स्तुति करते हुए कवि कहते हैं कि जिस प्रकार पूनम का चांद सब को आह्लादित कर देता है, उसी प्रकार सभी के दिल को प्रमोदित करने वाले अप्रतिहतपराक्रमशाली श्रीकृष्ण को मेरा नमस्कार।

**मयूरपिच्छमुकुटः कृष्णः कनककुण्डलः।**
**पीतवासा घनश्यामः सदैव हृदि वर्त्तताम् ।। 9 ।।**

**अन्वयः**- मयूरपिच्छमुकुटः कनककुण्डलः पीतवासा घनश्यामः सदैव (मे) हृदि वर्त्तताम्।

**संस्कृतव्याख्या**- मयूरपिच्छमुकुटः मयूरस्य केकिनः पिच्छमेव शिखण्ड एव मुकुटं शिरोभूषणं यस्य सः (बहुब्रीहिः) ''शिखण्डश्च पिच्छवर्हे नपुंसके'' इत्यमरः। कनककुण्डलः कनकस्य सुवर्णस्य कुण्डले कर्णभूषणे यस्य सः, पीतवासा पीतः हरिद्राभः वासः वसनं यस्य सः, घनश्यामः घन इव मेघ इव श्यामः कृष्णः यः (एवंभूतः सः) कृष्णः वासुदेवः सदैव सर्वदा सततं वा, (मम) हृदि चेतसि, वर्त्तताम् तिष्ठतु निवसतु वा।

बहुविधैरलंकारैरलंकृतः भगवान् यशोदानन्दनः श्रीकृष्णः सततमेव मे भोलानाथस्य हृदये विलसतामिति भावः । पद्येऽस्मिन्ननुष्टुप्छन्दः, परिकरश्चालंकारः। उक्तं चैतल्लक्षणं यथा :-

**''विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः''** (का.प्र.10/118)

भाषार्थः- जिन के मस्तक पर मोर पिच्छ सुशोभित है, जिन के कानों पर सोने के कुण्डल हैं और जिन्होने पीले रंग का वस्त्र धारण कर रखा है, ऐसे बादल की तरह सांवले वासुदेव श्रीकृष्ण मेरे हृदय में सदैव विराजते रहें।

**वनमालोल्लसद्वक्षा वेणुनादविभूषितः।**
**गोपीजनमनोहारी कृष्णः स हृदि वर्त्तताम् ।। 10 ।।**

**अन्वयः**- वनमालोल्लसद्वक्षा वेणुनादविभूषितः गोपीजनमनोहारी सः कृष्णः हृदि वर्त्तताम्।।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली